# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-3)(New&Old)** | **प्रश्नपत्रम् – 6** | गुणाः –70 |
| विषयः – रामानुजवेदान्तः | **कोड –C.C.2.3.6** | समयः- 8 तः 11 |
| दिनाङ्कः –15/10/2019 | सन्दर्भग्रन्थः – तैत्तिरीयैतरेयोपनिषदौ | |

**प्रथमान्वितिः (Unit 1)** — गुणाः

**प्रश्न १ अधस्तनमन्त्रेषु द्वयोः व्याख्यानं यथाग्रन्थं लिखत।** १०

१ शीक्षां व्याख्यास्यामः । वर्णः स्वरः। मात्रा बलम्। साम संतानः। इत्युक्तः शीक्षाध्यायः।

२ अथाधिविद्यम्। आचार्यः पूर्वरूपम्। अन्तेवास्युत्तररूपम्। विद्या सन्धिः। प्रवचनं संधानम्। इत्यधिविद्यम्।

३ अहं वृक्षस्य रेरिवा। कीर्तिः पृष्ठं गिरेरिव। ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्ति। द्रविणं सवर्चसम्। सुमेधा अमृतोक्षितः। इति त्रिशंकोर्वेदानुवचनम्।

**प्रश्न २ कस्यचिदेकस्य उत्तरं लिखत।** १०

१ पञ्चमानुवाकस्य सारांशं प्रतिपादयत।

२ ॐ स्वरूपं प्रतिपाद्य ॐकारस्य महिमानं अविशदमुपपादयत।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ अधस्तनमन्त्रेषु द्वयोः व्याख्यानं यथाग्रन्थं लिखत।** १०

१ अन्नं ब्रह्मेति व्यजानात्। अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते अन्नेन जातानि जीवन्ति। अन्नं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय पुनरेव वरुणं पितरमुपससार।

२ यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचनेति। तस्यैष एव शारीर आत्मा यः पूर्वस्य।

३ असद्वा इदमग्र आसीत्। ततो वै सदजायत। तदात्मानं स्वयमकुरुत।

तस्मात्तत्सुकृतमुच्यते इति।

**प्रश्न ४ कस्यचिदेकस्य उत्तरं लिखत।** **१०**

१ परमात्मनः स्वरूपलक्षणं प्रतिपाद्य तत्प्राप्तिकालं विशदयत।

२ तैत्तिरीयोपनिषदः परिचयं विलिख्य तन्महत्वं प्रतिपादयत।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधस्तनमन्त्रेषु द्वयोः व्याख्यानं यथाग्रन्थं लिखत।** **१०**

१ ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमलमिति॥

२ सोऽस्यायमात्मा पुण्येभ्यः प्रतिधीयते।
अथास्यायमितर आत्मा कृतकृत्यो वयोगतः प्रैति । स इतः प्रयन्नेव पुनर्जायते तदस्य तृतीयं जन्म॥

३ स एतेन प्रज्ञेनात्मनास्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वामृतः समभवत्समभवत्॥

**प्रश्न ६ कस्यचिदेकस्य उत्तरं लिखत।** **१०**

१ सृष्टेरुत्पत्तिक्रमं यथाग्रन्थं प्रतिपाद्यताम्।

२ ऐतरेयोपनिषदः तृतीयाध्यायस्य सारांशं प्रतिपादयत।

**प्रश्न ७ निम्नलिखितेषु दशप्रश्नानाम् लघूत्तराणि लिखत।** **१०**

१ तैत्तिरीयोपनिषद् कृष्णयजुर्वेदीयाऽस्ति वा शुक्लयजुर्वेदीया?

२ पञ्चाधिकरणानि कानि सन्ति?

३ अन्तर्हृदये आकाशे को विराजते?

४ शिक्षावल्यां कत्यनुवाकास्सन्ति?

५ कीदृशानि कर्माणि सेवितव्यानि?

६ ब्रह्मवित् कमाप्नोति?

७ कस्मादाकाशः सम्भूतः?

८ अद्भ्यः किं तत्त्वमुत्पन्नम्?

९ को नाम अनुप्रश्नः?

१० वरुणस्य पुत्रस्य नाम किम्?

११ ऐतरेयोपनिषद् कस्य वेदस्यान्तर्गताऽस्ति?

१२ ऐतरेयोपनिषदि कत्यध्यायाः सन्ति?

१३ आत्मा कतिविधः ? कश्च स: ?

१४ कः उपास्यदेवः?

१५ तृतीयेऽध्याये कति मन्त्रास्सन्ति?